
पर्व्वतानां सुखं मेरुर्गरुड़: पततां सुखम् ॥”)
पतनशीले त्रि । इति मेदिनी ॥
पतनं, क्ली, (पत्+भावे ल्युट् ।) पातः । पड़न् इति भाषा । यथा,— [दुःसहम् ॥”
“अशनेः पतने न वेदना पतनज्ञानमतीव
इत्युद्भटः ॥
“द्विजातिकर्म्मभ्यो हानिः पतनं परत्र चासिद्धिस्तमेके नरकम् ।” इति हारीतसूत्रम् ॥ पापम् । यथा, प्रायश्चित्तविवेके ।
“विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥”
पतमः, पुं, (पतति कर्म्मक्षये यस्मात् । पत्+अम । क्षीणपुण्यानां चन्द्रलोकात् पतनं शास्त्रे प्रसिद्धम् ।) चन्द्रः । (पततीति । पत्+अम ।) पक्षी । पतङ्गः । इति संक्षिप्तसारोणादिवृत्तिः ॥
पतयालुः, त्रि, (पत्+“स्पृहिगृहिपतिदयीति ।” ३।२।१५८ । इति आलुच् ।) पतनशीलः । तत्पर्य्यायः । पातुकः २ । इत्यमरः ।३।२।२७ ॥
पतसः, पुं, (पततीति । “अत्यविचमीति ।” उणां ३।११७ । इति असच् ।) पक्षी । इत्युणादिवृत्तिः ॥ चन्द्रः । पतङ्गः । इति संक्षिप्तसारोणादिवृत्तिः ॥
पताका, स्त्री, पत्यते ज्ञायते कस्यचित् भेदोऽनया । (पत्+“बलाकादयश्च ।” उणां ४।१४ । इति आक प्रत्ययेन साधुः ।) ध्वजम् । निशान् इति भाषा । (यथा, महाभारते ।६।१७।१५ ।
“श्वेतैश्छत्रैः पताकाभिर्ध्वजवारणवाजिभिः ।
तान्यनीकान्यशोभन्त राजन्रथपदातिभिः ॥”)
तत्पर्य्यायः । वैजयन्ती २ केतनम् ३ ध्वजम् ४ । इत्यमरः ।२।८।६६ ॥ पटाका ५ जयन्ती ६ वैजयन्तिका ७ कदली ८ कन्दुली ९ केतुः १० कदलिका ११ व्योममण्डलम् १२ । इति शब्दरत्नावली ॥ चिह्नम् १३ । इति जटाधरः ॥ केतनं ध्वजं एतद्द्वयं पताकादण्डे । इति भरतः ॥ सौभाग्यम् । नाटकाङ्गम् । इति मेदिनी ॥ (यथा, साहित्यदर्पणे । ६ । २७ ।
“पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि ॥”
इह नाट्ये ॥ तल्लक्षणं यथा तत्रैव । ६ । २८ ।
“यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥”
तद्भेदानाह तत्रैव । ६ । २९—३२ ।
“सहसैवार्थसम्पत्तिर्गुणवत्युपचारतः ।
पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥
यथा, रत्नावल्यां ‘वासवदत्तेयमिति’ राजा यदा तत्कण्ठपाशं मोचयति तदा तदुक्त्या ‘सागरिकेयमिति’ प्रत्यभिज्ञाय ‘कथं प्रिया मे सागरिका अलमलमतिमात्रम्’ इत्यादि फलरूपार्थसम्पत्तिः पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्कृष्टा । १ ।
वचः सातिशयश्लिष्टं नानाबन्धसमाश्रयम् ।
पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥
यथा, वेणीसंहारे सूत्रधारः ।
‘रक्तप्रसाधितभुवः क्षतविग्रहाश्च
स्वस्था भवन्तु कुरुराजसुताः सभृत्याः ।
अत्र रक्तादीनां रुधिरशरीरार्थहेतुकश्लेषवशेन बीजार्थप्रतिपादनात् नेष्टमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम् । २ ।
अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् ।
श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥
लीनं अव्यक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रत्युत्तरेणोपेतं सविनयं विशेषनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम् । यथा, वेणीसंहारे २ अङ्के । कञ्चुकी । ‘देव ! भग्नं भग्नम् ।’ राजा । ‘केन ।’ कञ्चुकी । ‘भीमेन ।’ राजा । ‘कस्य ।’ कञ्चुकी । ‘भवतः ।’ राजा । ‘आः ! किं प्रलपसि ?’ कञ्चुकी । (सभयम्) ‘देव ! ननु ब्रवीमि । भग्नं भीमेन भवतः ।’ राजा । ‘धिक् वृद्धापसद ! कोऽयमद्य ते व्यामोहः ।’ कञ्चुकी । ‘देव ! न व्यामोहः सत्यमेव ।
भग्नं भीमेन भवतो मरुता रथकेतनम् ।
पतितं किङ्किणीक्वाणबद्धाक्रन्दमिव क्षितौ ॥’
अत्र दुर्य्योधनोरुभङ्गरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम् । ३ ।
द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः ।
प्रधानार्थान्तरापेक्षी पताकास्थानकं परम् ॥” ४ ॥)
अङ्कः । केतुः । इति हेमचन्द्रः ॥ अस्य विवरणं ध्वजशब्दे द्रष्टव्यम् ॥
पताकी, [न्] त्रि, (पताका विद्यतेऽस्य । पताका+इनिः ।) वैजयन्तिकः । पताकाधारी । इत्यमरः । २ । ८ । ७१ ॥ (यथा, महाभारते । ६ । १७ । २० ।
“स तु गोशासनः शैब्यः सहितः सर्व्वराजभिः ।
ययौ मातङ्गराजेन राजार्हेण पताकिना ॥”)
रिष्टारिष्टबोधकचक्रविशेषः । तस्य लिखनक्रमो यथा,—
“तिर्य्यगूर्द्ध्वगता रेखास्तिस्रो देयाः पताकया ।
युताः कार्य्या देवविदा सर्व्वसङ्गतरेखया ॥
दक्षस्योन्नतरेखातो वामं मेषादिराशयः ।
पञ्चाष्टयुग्मविंशाश्च शड्दशेन्द्राग्निसागराः ।
कर्कटाद्मीनपर्य्यन्तमङ्का देया यथाक्रमम् ॥




बालस्य जन्मकालीनग्रहलग्नमजादिषु ।
विन्यस्य चिन्तयेत् प्राज्ञः शुभाशुभं यथाग्रहात् ॥”
तत्र शुभाशुभज्ञानं यथा,—
“शुभदण्डयोगवेधैर्लग्नाद्बालस्य शोभनम् ।
पापदण्डयोगवेधै राश्यङ्काद्रिष्टिकालवित् ।
बलेऽधिके दिनं मध्ये मासो हीने च हायनम् ॥”
वेधज्ञानं यथा,—
“कर्कमीनधनुर्भ्याञ्च हरेः कीटघटेन च ।
स्त्रियास्तौलिमृगाभ्याञ्च घटे मीनेन कन्यया ॥
धनुषो मृगकर्किभ्यां मकरे धनुषा स्त्रिया ।
मीने कर्कितुलाभ्याञ्च मीनस्त्रीधनुषा त्वजे ॥
तुलाकर्किमृगैर्द्वन्द्वे कीटकुम्भवृषेषु च ।
सिंहवद्वेध एतेषु वामदक्षिणसंमुखैः ॥
राहुकेत्वर्कसौरारैः पापैर्विद्धो युतोऽशुभः ।
तदन्यैर्युतविद्धस्तु लग्नराशिः शुभप्रदः ॥”
रिष्टिकालो यथा,—
“एकोनविंशतिः कर्के सिंहे सप्तदशैव तु ।
षट्त्रिंशद्ववलायाञ्च षड्विंशतिस्तुलाधरे ॥
वृश्चिके सिंहवज्ज्ञेयस्त्रिंशच्छरासने ।
षड्विंशं मकरे ज्ञेयं कुम्भे सप्तदश स्मृताः ॥
नव युग्मे तथा मीने मेषे षड्दशभिस्तथा ।
वृषभे च तथा सिंहे युग्मेऽष्ट हरलोचने ॥
त्रितयाङ्कादियं संख्या दिनमासाब्दनिर्णये ।
एकाङ्काद्विग्रहाङ्काद्वा क्वचिद्रिष्टेश्च सम्भवः ॥”
अथ यामार्द्धाधिपज्ञानम् ।
“वारेशादर्द्धयामेषु रात्र्यह्नोः पञ्चषट् क्रमात् ।
अधिपाः सूर्य्यहोराश्च यथार्काहे भवन्ति ते ।
रवीज्येन्दुभृगुज्ञाजशनिक्षरवयो निशि ॥
रविशुक्रज्ञरात्रीशशनीज्यकुजभास्कराः ।
दिने ज्ञेयाः परञ्चैवं तत्राध्यक्षाश्चतुर्ग्रहाः ॥”
अथ दण्डाधिपज्ञानम् ।
“पापदण्डे भवेद्रिष्टिः शुभदण्डे शुभं भवेत् ।
शुभग्रहस्य दण्डे तु कर्म्मारम्भाच्छुभं भवेत् ॥
यस्यार्द्धयामस्तस्यैव प्राग्दण्डः सर्व्वदा ततः ।
षट् षट् परीत्य दण्डाश्च त्रयो रात्रौ मता यथा ॥
आदित्ये भृगुजो बुधोऽपि च शशी सोमे शनीज्यौ कुजो
भौमेऽर्कः सितसोमजौ च शशिजे सोमः शनिर्व्वाक्पतिः ।
जीवेऽङ्गाररवी भृगुर्भृगुसुते सौम्येन्दुमार्त्तण्डजाः
काले जीवमहीजतिर्म्मकिरणा रात्रौ च दण्डाधिपाः ॥
यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धकः ।
तदर्द्धात्तु तृतीयः स्यात्तदर्द्धात्तु तुरीयकः ॥
अङ्काभावे तु राहुः स्यात् तदङ्को वसुसंज्ञकः ।
भमाङ्कस्य परित्यागाद्दिवादण्डाधिपा यथा ॥
रविदनुजबुधग्लौश्चन्द्रसूरासुरज्ञाः
कुजरविदनुजज्ञाश्चेन्दुसूरासुराश्च ।
गुरुशशिरविदैत्याः शुक्रभौमार्कदैत्याः
शनिकुजरविदैत्या दण्डपास्त्वर्द्धयामे ॥”
शुभाशुभदण्डज्ञानं यथा,—
“शेषावर्कस्य दण्डौ सततशुभकरावादिशेषौ तथेन्दोः
शेषो दण्डः कुजस्याप्यथ गुरुबुधयोरादमर्द्धं प्रशस्तम् ।
आद्यर्द्धदण्डस्तथैको भृगुकुलनृपतेः सर्व्वकार्य्येषु शस्तो
दण्डाश्चत्वार एते क्वचिदपि समये नैव शौरेः प्रशस्ताः ॥”